॥ श्रीहरिः ॥

1664

श्रीगोपालसहस्रनामस्तोत्रम्

(नामावलिसहितम्)

(संक्षिप्त प्रयोग-विधिसहित)

गीताप्रेस, गोरखपुर

प्रकाशक एवं मुद्रक—**गीताप्रेस, गोरखपुर—२७३००५**

गोबिन्दभवन-कार्यालय, कोलकाता का संस्थान

फोन : (०५५१) २३३४७२१; फैक्स: २३३६९९७

website:**www.gitapress.org** | e-mail:**booksales@gitapress.org**

॥ श्रीहरिः ॥

संक्षिप्त प्रयोग-विधि

सर्वप्रथम स्नान आदिसे पवित्र हो जाय। जब सहस्रनामस्तोत्रका पाठ करना हो अथवा सहस्रार्चन करना हो, श्रीगोपालजीकी प्रतिमाको अपने सम्मुख किसी काष्ठपीठ आदिपर यथाविधि स्थापित कर ले, अपने बैठनेका आसन भी लगा ले। पूजन आदिकी सभी सामग्रियोंको यथास्थान रखकर अपने आसनपर पूर्वाभिमुख या उत्तराभिमुख बैठ जाय। दीपक जलाकर पूर्वाभिमुख रख दे और हाथ धो ले। '**दीपज्योतिर्नमोऽस्तु ते**' कहकर पुष्प अर्पितकर कर्मसाक्षी दीपकका पूजन कर ले। तिलक लगा ले तथा निम्न मन्त्रोंसे आचमन करे—

'**ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः।**'

तथा '**ॐ हृषीकेशाय नमः**' कहकर हाथ धो ले।

निम्न मन्त्रसे अपने ऊपर जल छिड़ककर मार्जन कर ले—

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु।

तदनन्तर दाहिने हाथमें जल, पुष्प तथा अक्षत लेकर निम्न संकल्प करे—

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तैकदेशे ....नगरे/ग्रामे ....वैक्रमाब्दे

....संवत्सरे ....मासे ....पक्षे ....तिथौ ....वासरे ....गोत्रः शर्मा/वर्मा/गुप्तोऽहं श्रीगोपालप्रीत्यर्थं* सहस्रनामस्तोत्रपाठं करिष्ये। (यदि सहस्रार्चन करना हो तो '**सहस्रनामार्चनं करिष्ये**'—ऐसा बोलना चाहिये।)

हाथका जलाक्षत छोड़ दे।

अर्चन-पूजनके समय श्रीगोपालजीके विनियोगका मन्त्र पढ़कर जल छोड़ना चाहिये तथा न्यास करना चाहिये। विनियोग और न्यासके मन्त्र स्तोत्रके प्रारम्भमें लिखे गये हैं।

---

* अगर किसी कामनाकी सिद्धिके लिये सहस्रार्चन करना हो तो संकल्पमें '**यथेप्सितकार्यसिद्धिद्वारा श्रीगोपालप्रीत्यर्थं यथालब्धोपचारैः पूजनपूर्वकं ....द्रव्यैः सहस्रार्चनं करिष्ये**'—ऐसी योजना कर ले।

इसके अनन्तर श्रीगोपालजीका ध्यान, जो स्तोत्रके साथ दिया गया है, उससे भक्तिभावपूर्वक श्रीगोपालजीके स्वरूपका ध्यान करना चाहिये तथा मन्त्रोंसे पंचोपचार या मानस-पूजन करके स्तोत्रका पाठ करना चाहिये —

मानस-पूजन—

१-ॐ लं पृथिव्यात्मकं गन्धं परिकल्पयामि।

(प्रभो! मैं पृथिवीरूप गन्ध (चन्दन) आपको अर्पित करता हूँ।)

२-ॐ हं आकाशात्मकं पुष्पं परिकल्पयामि।

(प्रभो! मैं आकाशरूप पुष्प आपको अर्पित करता हूँ।)

३-ॐ यं वाय्वात्मकं धूपं परिकल्पयामि।

(प्रभो! मैं वायुदेवके रूपमें धूप आपको प्रदान करता हूँ।)

४-ॐ रं वह्न्यात्मकं दीपं दर्शयामि।

(प्रभो! मैं अग्निदेवके रूपमें दीपक आपको प्रदान करता हूँ।)

५-ॐ वं अमृतात्मकं नैवेद्यं निवेदयामि।

(प्रभो! मैं अमृतके समान नैवेद्य आपको निवेदन करता हूँ।)

६-ॐ सौं सर्वात्मकं सर्वोपचारं समर्पयामि।

(प्रभो! मैं सर्वात्माके रूपमें संसारके सभी उपचारोंको आपके चरणोंमें समर्पित करता हूँ।)

सहस्रार्चन करते समय उपलब्ध सामग्रियोंसे षोडशोपचार या पंचोपचार

पूजन करना चाहिये, तदनन्तर सहस्रनामावलीके प्रत्येक नाममन्त्रसे सामग्री गोपालजीपर चढ़ाये। स्त्रियों तथा जिनका यज्ञोपवीत नहीं हुआ है, उन्हें प्रत्येक नामके पहले '**ॐ**' के स्थानपर '**श्री**' शब्दका प्रयोग करना चाहिये, जैसे—'**श्रीगोपालेश्वराय नमः।**' अन्तमें आरती, पुष्पांजलि तथा क्षमा-प्रार्थना करके अर्चनको पूर्ण करे।

ॐ श्रीपरमात्मने नमः

श्रीगोपालसहस्रनामस्तोत्रम्

पार्वत्युवाच

कैलासशिखरे रम्ये गौरी पृच्छति शङ्करम्।
ब्रह्माण्डाखिलनाथस्त्वं सृष्टिसंहारकारकः॥ १॥

त्वमेव पूज्यसे लोकैर्ब्रह्मविष्णुसुरादिभिः।
नित्यं पठसि देवेश कस्य स्तोत्रं महेश्वर॥ २॥

आश्चर्यमिदमत्यन्तं जायते मम शङ्कर।
तत्प्राणेश महाप्राज्ञ संशयं छिन्धि शङ्कर॥ ३॥

श्रीमहादेव उवाच

धन्यासि कृतपुण्यासि पार्वति प्राणवल्लभे।
रहस्यातिरहस्यं च यत्पृच्छसि वरानने॥ ४॥

स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः॥ ५॥

दत्ते च सिद्धिहानिः स्यात्तस्माद्यत्नेन गोपयेत्।
इदं रहस्यं परमं पुरुषार्थप्रदायकम्॥ ६॥

धनरत्नौघमाणिक्यतुरङ्गमगजादिकम्।
ददाति स्मरणादेव महामोक्षप्रदायकम्॥ ७॥

तत्तेऽहं सम्प्रवक्ष्यामि शृणुष्वावहिता प्रिये।
योऽसौ निरञ्जनो देवश्चित्स्वरूपी जनार्दनः॥ ८॥

संसारसागरोत्तारकारणाय सदा नृणाम्।
श्रीरंगादिकरूपेण त्रैलोक्यं व्याप्य तिष्ठति॥ ९ ॥

ततो लोका महामूढा विष्णुभक्तिविवर्जिताः।
निश्चयं नाधिगच्छन्ति पुनर्नारायणो हरिः॥ १० ॥

निरञ्जनो निराकारो भक्तानां प्रीतिकामदः।
वृन्दावनविहाराय गोपालं रूपमुद्वहन्॥ ११ ॥

मुरलीवादनाधारी राधायै प्रीतिमावहन्।
अंशांशेभ्यः समुन्मील्य पूर्णरूपकलायुतः॥ १२॥

श्रीकृष्णचन्द्रो भगवान् नन्दगोपवरोद्यतः।
धरणीरूपिणी माता यशोदानन्ददायिनी॥ १३॥

द्वाभ्यां प्रयाचितो नाथो देवक्यां वसुदेवतः।
ब्रह्मणाभ्यर्थितो देवो देवैरपि सुरेश्वरि॥ १४॥

जातोऽवन्यां मुकुन्दोऽपि मुरलीवेदरेचिका।
तया सार्द्धं वचः कृत्वा ततो जातो महीतले॥ १५॥

संसारसारसर्वस्वं श्यामलं महदुज्ज्वलम्।
एतज्ज्योतिरहं वेद्यं चिन्तयामि सनातनम्॥ १६॥

गौरतेजो विना यस्तु श्यामतेजः समर्चयेत्।
जपेद्वा ध्यायते वापि स भवेत्पातकी शिवे॥ १७॥

स ब्रह्महा सुरापी च स्वर्णस्तेयी च पञ्चमः।
एतैर्दोषैर्विलिप्येत तेजोभेदान्महेश्वरि॥ १८॥

तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकम्।
तस्मादिदं महादेवि गोपालेनैव भाषितम्॥ १९॥

दुर्वाससो मुनेर्मोहे कार्तिक्यां रासमण्डले।
ततः पृष्टवती राधा सन्देहं भेदमात्मनः॥ २०॥

निरञ्जनात्समुत्पन्नं मयाधीतं जगन्मयि।
श्रीकृष्णेन ततः प्रोक्तं राधायै नारदाय च॥ २१॥

ततो नारदतः सर्वं विरला वैष्णवास्तथा।
कलौ जानन्ति देवेशि गोपनीयं प्रयत्नतः॥ २२॥

शठाय कृपणायाथ दाम्भिकाय सुरेश्वरि।
ब्रह्महत्यामवाप्नोति तस्माद्यत्नेन गोपयेत्॥ २३॥

अथ करन्यासः

अस्य श्रीगोपालसहस्त्रनामस्तोत्रमन्त्रस्य श्रीनारद ऋषिः, अनुष्टुप् छन्दः, श्रीगोपालो देवता, कामो बीजम्, माया शक्तिः, चन्द्रः कीलकम्, श्रीकृष्णचन्द्र-भक्तिरूपफलप्राप्तये श्रीगोपालसहस्त्रनामजपे विनियोगः॥ अथवा ॐ ऐं क्लीं बीजम्, श्रीं ह्रीं शक्तिः, श्रीवृन्दावननिवासः कीलकम्, श्रीराधाप्रियं

परं ब्रह्मेति मन्त्रः, धर्मादिचतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः। ॐ क्लां अङ्गुष्ठाभ्यां नमः, ॐ क्लीं तर्जनीभ्यां नमः, ॐ क्लूं मध्यमाभ्यां नमः, ॐ क्लैं अनामिकाभ्यां नमः, ॐ क्लौं कनिष्ठिकाभ्यां नमः, ॐ क्लः करतलकरपृष्ठाभ्यां नमः, ॐ क्लां हृदयाय नमः, ॐ क्लीं शिरसे स्वाहा, ॐ क्लूं शिखायै वषट्, ॐ क्लैं कवचाय

हुम्, ॐ क्लौं नेत्रत्रयाय वौषट्, ॐ क्लः अस्त्राय फट्॥

अथ ध्यानम्

कस्तूरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभं
नासाग्रे वरमौक्तिकं करतले वेणुः करे कङ्कणम्।
सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावली
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः॥ १॥

फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम्।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे॥ २॥

॥ अथ श्रीगोपालसहस्रनामस्तोत्रः प्रारम्भः ॥

ॐ क्लीं देवः कामदेवः कामबीजशिरोमणिः ।
श्रीगोपालो महीपालः सर्ववेदाङ्गपारगः ॥ १ ॥
धरणीपालको धन्यः पुण्डरीकः सनातनः ।
गोपतिर्भूपतिः शास्ता प्रहर्ता विश्वतोमुखः ॥ २ ॥
आदिकर्ता महाकर्ता महाकालः प्रतापवान् ।
जगज्जीवो जगद्धाता जगद्धर्ता जगद्वसुः ॥ ३ ॥

मत्स्यो भीमः कुहूभर्ता हर्ता वाराहमूर्तिमान्।
नारायणो हृषीकेशो गोविन्दो गरुडध्वजः॥ ४॥

गोकुलेन्द्रो महाचन्द्रः शर्वरीप्रियकारकः।
कमलामुखलोलाक्षः पुण्डरीकशुभावहः॥ ५॥

दुर्वासाः कपिलो भौमः सिन्धुसागरसङ्गमः।
गोविन्दो गोपतिर्गोत्रः कालिन्दीप्रेमपूरकः॥ ६॥

गोपस्वामी गोकुलेन्द्रो गोवर्धनवरप्रदः।
नन्दादिगोकुलत्राता दाता दारिद्र्यभञ्जनः॥ ७॥

सर्वमङ्गलदाता च सर्वकामप्रदायकः।
आदिकर्ता महीभर्ता सर्वसागरसिन्धुजः॥ ८॥

गजगामी गजोद्धारी कामी कामकलानिधिः।
कलङ्करहितश्चन्द्रो बिम्बास्यो बिम्बसत्तमः॥ ९॥

मालाकारः कृपाकारः कोकिलास्वरभूषणः ।
रामो नीलाम्बरो देवो हली दुर्दममर्दनः ॥ १० ॥

सहस्राक्षपुरीभेत्ता महामारीविनाशनः ।
शिवः शिवतमो भेत्ता बलारातिप्रपूजकः ॥ ११ ॥

कुमारीवरदायी च वरेण्यो मीनकेतनः ।
नरो नारायणो धीरो राधापतिरुदारधीः ॥ १२ ॥

श्रीपतिः श्रीनिधिः श्रीमान् मापतिः प्रतिराजहा।
वृन्दापतिः कुलग्रामी धामी ब्रह्म सनातनः॥ १३॥
रेवतीरमणो रामश्चञ्चलश्चारुलोचनः।
रामायणशरीरोऽयं रामी रामः श्रियःपतिः॥ १४॥
शर्वरः शर्वरी शर्वः सर्वत्र शुभदायकः।
राधाराधयितो राधी राधाचित्तप्रमोदकः॥ १५॥

राधारतिसुखोपेतो राधामोहनतत्परः ।
राधावशीकरो राधाहृदयाम्भोजषट्पदः ॥ १६ ॥

राधालिङ्गनसम्मोहो राधानर्तनकौतुकः ।
राधासञ्जातसम्प्रीती राधाकामफलप्रदः ॥ १७ ॥

वृन्दापतिः कोशनिधिः कोकशोकविनाशकः ।
चन्द्रापतिश्चन्द्रपतिश्चण्डकोदण्डभञ्जनः ॥ १८ ॥

रामो दाशरथी रामो भृगुवंशसमुद्भवः ।
आत्मारामो जितक्रोधो मोहो मोहान्धभञ्जनः ॥ १९ ॥

वृषभानुर्भवो भावः काश्यपिः करुणानिधिः ।
कोलाहलो हली हाली हेली हलधरप्रियः ॥ २० ॥

राधामुखाब्जमार्तण्डो भास्करो रविजो विधुः ।
विधिर्विधाता वरुणो वारुणो वारुणीप्रियः ॥ २१ ॥

रोहिणीहृदयानन्दी वसुदेवात्मजो बली।
नीलाम्बरो रौहिणेयो जरासन्धवधोऽमलः॥ २२॥

नागो नवाम्भो विरुदो वीरहा वरदो बली।
गोपथो विजयी विद्वान् शिपिविष्टः सनातनः॥ २३॥

पर्शुरामवचोग्राही वरग्राही शृगालहा।
दमघोषोपदेष्टा च रथग्राही सुदर्शनः॥ २४॥

वीरपत्नीयशस्त्राता जराव्याधिविघातकः ।
द्वारकावासतत्त्वज्ञो हुताशनवरप्रदः ॥ २५ ॥

यमुनावेगसंहारी नीलाम्बरधरः प्रभुः ।
विभुः शरासनो धन्वी गणेशो गणनायकः ॥ २६ ॥

लक्ष्मणो लक्षणो लक्ष्यो रक्षोवंशविनाशनः ।
वामनो वामनीभूतो वमनो वमनारुहः ॥ २७ ॥

यशोदानन्दनः कर्ता यमलार्जुनमुक्तिदः।
उलूखली महामानी दामबद्धाह्वयी शमी॥ २८॥

भक्तानुकारी भगवान् केशवोऽचलधारकः।
केशिहा मधुहा मोही वृषासुरविघातकः॥ २९॥

अघासुरविनाशी च पूतनामोक्षदायकः।
कुब्जाविनोदी भगवान् कंसमृत्युर्महामखी॥ ३०॥

अश्वमेधो वाजपेयो गोमेधो नरमेधवान्।
कन्दर्पकोटिलावण्यश्चन्द्रकोटिसुशीतलः ॥ ३१ ॥

रविकोटिप्रतीकाशो वायुकोटिमहाबलः।
ब्रह्मा ब्रह्माण्डकर्ता च कमलावाञ्छितप्रदः ॥ ३२ ॥

कमला कमलाक्षश्च कमलामुखलोलुपः।
कमलाव्रतधारी च कमलाभः पुरन्दरः ॥ ३३ ॥

सौभाग्याधिकचित्तोऽयं महामायी महोत्कटः ।
तारकारिः सुरत्राता मारीचक्षोभकारकः ॥ ३४ ॥

विश्वामित्रप्रियो दान्तो रामो राजीवलोचनः ।
लङ्काधिपकुलध्वंसी विभीषणवरप्रदः ॥ ३५ ॥

सीतानन्दकरो रामो वीरो वारिधिबन्धनः ।
खरदूषणसंहारी साकेतपुरवासनः ॥ ३६ ॥

चन्द्रावलीपतिः कूलः केशी कंसवधोऽमरः ।
माधवो मधुहा माध्वी माध्वीको माधवो मधुः ॥ ३७ ॥

मुञ्जाटवीगाहमानो धेनुकारिर्धरात्मजः ।
वंशीवटविहारी च गोवर्धनवनाश्रयः ॥ ३८ ॥

तथा तालवनोद्देशी भाण्डीरवनशङ्खहा ।
तृणावर्तकथाकारी वृषभानुसुतापतिः ॥ ३९ ॥

राधाप्राणसमो राधावदनाब्जमधुव्रतः ।
गोपीरञ्जनदैवज्ञो लीलाकमलपूजितः ॥ ४० ॥

क्रीडाकमलसन्दोहो गोपिकाप्रीतिरञ्जनः ।
रञ्जको रञ्जनो रङ्गो रङ्गी रङ्गमहीरुहः ॥ ४१ ॥

कामः कामारिभक्तोऽयं पुराणपुरुषः कविः ।
नारदो देवलो भीमो बालो बालमुखाम्बुजः ॥ ४२ ॥

अम्बुजो ब्रह्मसाक्षी च योगी दत्तवरो मुनिः।
ऋषभः पर्वतो ग्रामो नदीपवनवल्लभः॥ ४३॥

पद्मनाभः सुरज्येष्ठो ब्रह्मा रुद्रोऽहिभूषितः।
गणानां त्राणकर्ता च गणेशो ग्रहिलो ग्रही॥ ४४॥

गणाश्रयो गणाध्यक्षः क्रोडीकृतजगत्त्रयः।
यादवेन्द्रो द्वारकेन्द्रो मथुरावल्लभो धुरी॥ ४५॥

भ्रमरः कुन्तली कुन्तीसुतरक्षी महामखी।
यमुनावरदाता च काश्यपस्य वरप्रदः॥ ४६॥

शङ्खचूडवधोद्दामो गोपीरक्षणतत्परः।
पाञ्चजन्यकरो रामी त्रिरामी वनजो जयः॥ ४७॥

फाल्गुनः फाल्गुनसखो विराधवधकारकः।
रुक्मिणीप्राणनाथश्च सत्यभामाप्रियङ्करः॥ ४८॥

कल्पवृक्षो महावृक्षो दानवृक्षो महाफलः ।
अंकुशो भूसुरो भामो भामको भ्रामको हरिः ॥ ४९ ॥

सरलः शाश्वतो वीरो यदुवंशी शिवात्मकः ।
प्रद्युम्नो बलकर्ता च प्रहर्ता दैत्यहा प्रभुः ॥ ५० ॥

महाधनो महावीरो वनमालाविभूषणः ।
तुलसीदामशोभाढ्यो जालन्धरविनाशनः ॥ ५१ ॥

शूरः सूर्यो मृकण्डश्च भास्करो विश्वपूजितः ।
रविस्तमोहा वह्निश्च वाडवो वडवानलः ॥ ५२ ॥

दैत्यदर्पविनाशी च गरुडो गरुडाग्रजः ।
गोपीनाथो महीनाथो वृन्दानाथोऽवरोधकः ॥ ५३ ॥

प्रपञ्ची पञ्चरूपश्च लतागुल्मश्च गोपतिः ।
गङ्गा च यमुनारूपो गोदा वेत्रवती तथा ॥ ५४ ॥

कावेरी नर्मदा तापी गण्डकी सरयूस्तथा।
राजसस्तामसः सत्त्वी सर्वाङ्गी सर्वलोचनः ॥ ५५ ॥

सुधामयोऽमृतमयो योगिनीवल्लभः शिवः।
बुद्धो बुद्धिमतां श्रेष्ठो विष्णुर्जिष्णुः शचीपतिः ॥ ५६ ॥

वंशी वंशधरो लोको विलोको मोहनाशनः।
रवरावो रवो रावो बालो बालबलाहकः ॥ ५७ ॥

शिवो रुद्रो नलो नीलो लाङ्गली लाङ्गलाश्रयः ।
पारदः पावनो हंसो हंसारूढो जगत्पतिः ॥ ५८ ॥

मोहिनीमोहनो मायी महामायो महामखी ।
वृषो वृषाकपिः कालः कालीदमनकारकः ॥ ५९ ॥

कुब्जाभाग्यप्रदो वीरो रजकक्षयकारकः ।
कोमलो वारुणो राजा जलजो जलधारकः ॥ ६० ॥

हारकः सर्वपापघ्नः परमेष्ठी पितामहः।
खड्गधारी कृपाकारी राधारमणसुन्दरः॥ ६१॥

द्वादशारण्यसम्भोगी शेषनागफणालयः।
कामः श्यामः सुखः श्रीदः श्रीपतिः श्रीनिधिः कृतिः॥ ६२॥

हरिर्हरो नरो नारो नरोत्तम इषुप्रियः।
गोपालीचित्तहर्त्ता च कर्ता संसारतारकः॥ ६३॥

आदिदेवो महादेवो गौरीगुरुरनाश्रयः।
साधुर्मधुर्विधुर्धाता भ्राता क्रूरपरायणः॥ ६४॥

रोलम्बी च हयग्रीवो वानरारिर्वनाश्रयः।
वनं वनी वनाध्यक्षो महावन्द्यो महामुनिः॥ ६५॥

स्यमन्तकमणिप्राज्ञो विज्ञो विघ्नविघातकः।
गोवर्धनो वर्धनीयो वर्धनी वर्धनप्रियः॥ ६६॥

वर्धन्यो वर्धनो वर्धी वार्धिन्यः सुमुखप्रियः।
वर्धितो वृद्धको वृद्धो वृन्दारकजनप्रियः॥ ६७॥

गोपालरमणीभर्ता साम्बकुष्ठविनाशनः।
रुक्मिणीहरणः प्रेम प्रेमी चन्द्रावलीपतिः॥ ६८॥

श्रीकर्ता विश्वभर्ता च नरो नारायणो बली।
गणो गणपतिश्चैव दत्तात्रेयो महामुनिः॥ ६९॥

व्यासो नारायणो दिव्यो भव्यो भावुकधारकः ।
स्वः श्रेयसं शिवं भद्रं भावुकं भविकं शुभम् ॥ ७० ॥

शुभात्मकः शुभः शास्ता प्रशास्ता मेघनादहा ।
ब्रह्मण्यदेवो दीनानामुद्धारकरणक्षमः ॥ ७१ ॥

कृष्णः कमलपत्राक्षः कृष्णः कमललोचनः ।
कृष्णः कामी सदाकृष्णः समस्तप्रियकारकः ॥ ७२ ॥

नन्दो नन्दी महानन्दी मादी मादनकः किली।
मिली हिली गिली गोली गोलो गोलालयो गुली॥ ७३॥

गुग्गुली मारकी शाखी वटः पिप्पलकः कृती।
म्लेच्छहा कालहर्ता च यशोदायश एव च॥ ७४॥

अच्युतः केशवो विष्णुर्हरिः सत्यो जनार्दनः।
हंसो नारायणो लीलो नीलो भक्तिपरायणः॥ ७५॥

जानकीवल्लभो रामो विरामो विघ्ननाशनः ।
सहस्रांशुर्महाभानुर्वीरबाहुर्महोदधिः ॥ ७६ ॥

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
गोकुलानन्दकारी च प्रतिज्ञापरिपालकः ॥ ७७ ॥

सदारामः कृपारामो महारामो धनुर्धरः ।
पर्वतः पर्वताकारो गयो गेयो द्विजप्रियः ॥ ७८ ॥

कम्बलाश्वतरो रामो रामायणप्रवर्तकः।
द्यौर्दिवो दिवसो दिव्यो भव्यो भाविभयापहः॥ ७९॥

पार्वतीभाग्यसहितो भ्राता लक्ष्मीविलासवान्।
विलासी साहसी सर्वी गर्वी गर्वितलोचनः॥ ८०॥

मुरारिर्लोकधर्मज्ञो जीवनो जीवनान्तकः।
यमो यमादिर्यमनो यामी यामविधायकः॥ ८१॥

वंसुली पांसुली पांसुः पाण्डुरर्जुनवल्लभः ।
ललिताचन्द्रिकामाली माली मालाम्बुजाश्रयः ॥ ८२ ॥

अम्बुजाक्षो महायक्षो दक्षश्चिन्तामणिः प्रभुः ।
मणिर्दिनमणिश्चैव केदारो बदराश्रयः ॥ ८३ ॥

बदरीवनसम्प्रीतो व्यासः सत्यवतीसुतः ।
अमरारिनिहन्ता च सुधासिन्धुर्विधूदयः ॥ ८४ ॥

चन्द्रो रविः शिवः शूली चक्री चैव गदाधरः ।
श्रीकर्ता श्रीपतिः श्रीदः श्रीदेवो देवकीसुतः ॥ ८५ ॥

श्रीपतिः पुण्डरीकाक्षः पद्मनाभो जगत्पतिः ।
वासुदेवोऽप्रमेयात्मा केशवो गरुडध्वजः ॥ ८६ ॥

नारायणः परं धाम देवदेवो महेश्वरः ।
चक्रपाणिः कलापूर्णो वेदवेद्यो दयानिधिः ॥ ८७ ॥

भगवान्सर्वभूतेशो गोपालः सर्वपालकः।
अनन्तो निर्गुणोऽनन्तो निर्विकल्पो निरञ्जनः॥ ८८॥

निराधारो निराकारो निराभासो निराश्रयः।
पुरुषः प्रणवातीतो मुकुन्दः परमेश्वरः॥ ८९॥

क्षणावनिः सार्वभौमो वैकुण्ठो भक्तवत्सलः।
विष्णुर्दामोदरः कृष्णो माधवो मथुरापतिः॥ ९०॥

देवकीगर्भसम्भूतो यशोदावत्सलो हरिः।
शिवः सङ्कर्षणः शम्भुर्भूतनाथो दिवस्पतिः॥ ९१॥

अव्ययः सर्वधर्मज्ञो निर्मलो निरुपद्रवः।
निर्वाणनायको नित्यो नीलजीमूतसंनिभः॥ ९२॥

कलाक्षयश्च सर्वज्ञः कमलारूपतत्परः।
हृषीकेशः पीतवासो वसुदेवप्रियात्मजः॥ ९३॥

नन्दगोपकुमारार्यो नवनीताशनः प्रभुः ।
पुराणपुरुषः श्रेष्ठः शङ्खपाणिः सुविक्रमः ॥ ९४ ॥

अनिरुद्धश्चक्ररथः शार्ङ्गपाणिश्चतुर्भुजः ।
गदाधरः सुरार्तिघ्नो गोविन्दो नन्दकायुधः ॥ ९५ ॥

वृन्दावनचरः शौरिर्वेणुवाद्यविशारदः ।
तृणावर्तान्तको भीमो साहसो बहुविक्रमः ॥ ९६ ॥

शकटासुरसंहारी बकासुरविनाशनः ।
धेनुकासुरसङ्घातः पूतनारिर्नृकेसरी ॥ ९७ ॥

पितामहो गुरुः साक्षी प्रत्यगात्मा सदाशिवः ।
अप्रमेयः प्रभुः प्राज्ञोऽप्रतर्क्यः स्वप्नवर्धनः ॥ ९८ ॥

धन्यो मान्यो भवो भावो धीरः शान्तो जगद्गुरुः ।
अन्तर्यामीश्वरो दिव्यो दैवज्ञो देवतागुरुः ॥ ९९ ॥

क्षीराब्धिशयनो धाता लक्ष्मीवाँल्लक्ष्मणाग्रजः।
धात्रीपतिरमेयात्मा चन्द्रशेखरपूजितः ॥ १०० ॥

लोकसाक्षी जगच्चक्षुः पुण्यचारित्रकीर्तनः।
कोटिमन्मथसौन्दर्यो जगन्मोहनविग्रहः ॥ १०१ ॥

मन्दस्मिततमो गोपो गोपिकापरिवेष्टितः।
फुल्लारविन्दनयनश्चाणूरान्ध्रनिषूदनः ॥ १०२ ॥

इन्दीवरदलश्यामो बर्हिबर्हावतंसकः ।
मुरलीनिनदाह्लादो दिव्यमाल्याम्बराश्रयः ॥ १०३ ॥
सुकपोलयुगः सुभ्रूयुगलः सुललाटकः ।
कम्बुग्रीवो विशालाक्षो लक्ष्मीवान् शुभलक्षणः ॥ १०४ ॥
पीनवक्षाश्चतुर्बाहुश्चतुर्मूर्तिस्त्रिविक्रमः ।
कलङ्करहितः शुद्धो दुष्टशत्रुनिबर्हणः ॥ १०५ ॥
किरीटकुण्डलधरः कटकाङ्गदमण्डितः ।
मुद्रिकाभरणोपेतः कटिसूत्रविराजितः ॥ १०६ ॥

मञ्जीररञ्जितपदः सर्वाभरणभूषितः।
विन्यस्तपादयुगलो दिव्यमङ्गलविग्रहः॥ १०७॥
गोपिकानयनानन्दः पूर्णचन्द्रनिभाननः।
समस्तजगदानन्दः सुन्दरो लोकनन्दनः॥ १०८॥
यमुनातीरसञ्चारी राधामन्मथवैभवः।
गोपनारीप्रियो दान्तो गोपीवस्त्रापहारकः॥ १०९॥
शृङ्गारमूर्तिः श्रीधामा तारको मूलकारणम्।
सृष्टिसंरक्षणोपायः क्रूरासुरविभञ्जनः॥ ११०॥

नरकासुरहारी च मुरारिर्वैरिमर्दनः ।
आदितेयप्रियो दैत्यभीकरश्चेन्दुशेखरः ॥ १११ ॥
जरासन्धकुलध्वंसी कंसारातिः सुविक्रमः ।
पुण्यश्लोकः कीर्तनीयो यादवेन्द्रो जगन्नुतः ॥ ११२ ॥
रुक्मिणीरमणः सत्यभामाजाम्बवतीप्रियः ।
मित्रविन्दानाग्नजितीलक्ष्मणासमुपासितः ॥ ११३ ॥
सुधाकरकुले जातोऽनन्तप्रबलविक्रमः ।
सर्वसौभाग्यसम्पन्नो द्वारकायामुपस्थितः ॥ ११४ ॥

भद्रासूर्यसुतानाथो लीलामानुषविग्रहः ।
सहस्रषोडशस्त्रीशो भोगमोक्षैकदायकः ॥ ११५ ॥
वेदान्तवेद्यः संवेद्यो वैद्यो ब्रह्माण्डनायकः ।
गोवर्धनधरो नाथः सर्वजीवदयापरः ॥ ११६ ॥
मूर्तिमान्सर्वभूतात्मा आर्तत्राणपरायणः ।
सर्वज्ञः सर्वसुलभः सर्वशास्त्रविशारदः ॥ ११७ ॥
षड्गुणैश्वर्यसम्पन्नः पूर्णकामो धुरन्धरः ।
महानुभावः कैवल्यदायको लोकनायकः ॥ ११८ ॥

आदिमध्यान्तरहितः शुद्धसात्त्विकविग्रहः।
असमानः समस्तात्मा शरणागतवत्सलः॥ ११९॥
उत्पत्तिस्थितिसंहारकारणं सर्वकारणम्।
गम्भीरः सर्वभावज्ञः सच्चिदानन्दविग्रहः॥ १२०॥
विष्वक्सेनः सत्यसंधः सत्यवान्सत्यविक्रमः।
सत्यव्रतः सत्यसंज्ञः सर्वधर्मपरायणः॥ १२१॥
आपन्नार्तिप्रशमनो द्रौपदीमानरक्षकः।
कन्दर्पजनकः प्राज्ञो जगन्नाटकवैभवः॥ १२२॥

भक्तिवश्यो गुणातीतः सर्वैश्वर्यप्रदायकः।
दमघोषसुतद्वेषी बाणबाहुविखण्डनः॥ १२३॥
भीष्मभक्तिप्रदो दिव्यः कौरवान्वयनाशनः।
कौन्तेयप्रियबन्धुश्च पार्थस्यन्दनसारथिः॥ १२४॥
नारसिंहो महावीरः स्तम्भजातो महाबलः।
प्रह्लादवरदः सत्यो देवपूज्योऽभयङ्करः॥ १२५॥
उपेन्द्र इन्द्रावरजो वामनो बलिबन्धनः।
गजेन्द्रवरदः स्वामी सर्वदेवनमस्कृतः॥ १२६॥

शेषपर्यङ्कशयनो वैनतेयरथो जयी।
अव्याहतबलैश्वर्यसम्पन्नः पूर्णमानसः ॥ १२७ ॥
योगेश्वरेश्वरः साक्षी क्षेत्रज्ञो ज्ञानदायकः।
योगिहृत्पङ्कजावासो योगमायासमन्वितः ॥ १२८ ॥
नादबिन्दुकलातीतश्चतुर्वर्गफलप्रदः ।
सुषुम्णामार्गसञ्चारी देहस्यान्तरसंस्थितः ॥ १२९ ॥
देहेन्द्रियमनःप्राणसाक्षी चेतःप्रसादकः।
सूक्ष्मः सर्वगतो देही ज्ञानदर्पणगोचरः ॥ १३० ॥

तत्त्वत्रयात्मकोऽव्यक्तः कुण्डलीसमुपाश्रितः ।
ब्रह्मण्यः सर्वधर्मज्ञः शान्तो दान्तो गतक्लमः ॥ १३१ ॥
श्रीनिवासः सदानन्दो विश्वमूर्तिर्महाप्रभुः ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ १३२ ॥
समस्तभुवनाधारः समस्तप्राणरक्षकः ।
समस्तसर्वभावज्ञो गोपिकाप्राणवल्लभः ॥ १३३ ॥
नित्योत्सवो नित्यसौख्यो नित्यश्रीर्नित्यमङ्गलः ।
व्यूहार्चितो जगन्नाथः श्रीवैकुण्ठपुराधिपः ॥ १३४ ॥

पूर्णानन्दघनीभूतो गोपवेषधरो हरिः।
कलापकुसुमश्यामः कोमलः शान्तविग्रहः॥ १३५॥
गोपाङ्गनावृतोऽनन्तो वृन्दावनसमाश्रयः।
वेणुवादरतः श्रेष्ठो देवानां हितकारकः॥ १३६॥
बालक्रीडासमासक्तो नवनीतस्य तस्करः।
गोपालकामिनीजारश्चोरजारशिखामणिः*॥ १३७॥

*'चोरजारशिखामणिः' का अर्थ है कि भगवान्‌के समान चोर और जार दूसरा कोई है ही नहीं, हो सकता ही नहीं। दूसरे चोर और जार तो केवल अपना ही सुख चाहते हैं, पर भगवान् केवल दूसरेके सुखके लिये चोर और जारकी लीला करते हैं। उनकी ये दोनों ही लीलाएँ दिव्य, विलक्षण, अलौकिक हैं—'जन्म कर्म च मे दिव्यम्' (गीता ४।९)। संसारी

परं ज्योतिः पराकाशः परावासः परिस्फुटः।
अष्टादशाक्षरो मन्त्रो व्यापको लोकपावनः॥ १३८॥
सप्तकोटिमहामन्त्रशेखरो देवशेखरः।
विज्ञानज्ञानसन्धानस्तेजोराशिर्जगत्पतिः॥ १३९॥

चोर तो केवल वस्तुओंकी ही चोरी करते हैं, पर भगवान् वस्तुओंके साथ-साथ उन वस्तुओंके राग, आसक्ति, प्रियता आदिको भी चुरा लेते हैं। भगवान्ने गोपियोंके मक्खनके साथ-साथ उनके रागरूप बन्धनको भी खा लिया था। वे जार बनते हैं तो सुखके भोक्ताके साथ-साथ सुखासक्ति, सुखबुद्धिका भी हरण कर लेते हैं, जिससे सम्बन्धजन्य आकर्षण (काम) न रहकर केवल भगवान्का आकर्षण (विशुद्ध प्रेम) रह जाता है, अन्यकी सत्ता न रहकर केवल भगवान्की सत्ता रह जाती है। तात्पर्य है कि भगवान् अपने भक्तोंमें किसीको चोर और जार रहने ही नहीं देते, उनके चोर-जारपनेको ही हर लेते हैं। 'कनक' (धन) और 'कामिनी'

भक्तलोकप्रसन्नात्मा भक्तमन्दारविग्रहः।
भक्तदारिद्र्यदमनो भक्तानां प्रीतिदायकः॥ १४०॥
भक्ताधीनमनाः पूज्यो भक्तलोकशिवङ्करः।
भक्ताभीष्टप्रदः सर्वभक्ताघौघनिकृन्तनः॥ १४१॥
अपारकरुणासिन्धुर्भगवान्भक्ततत्परः ॥ १४२॥

इति श्रीसम्मोहनतन्त्रे पार्वतीश्वरसंवादे श्रीगोपालसहस्रनामस्तोत्रं सम्पूर्णम्।

(स्त्री)-की आसक्तिसे ही मनुष्य 'चोर' और 'जार' होता है। अतः कनक-कामिनीकी आसक्तिका सर्वथा अभाव करनेवाले होनेसे भगवान् चोर और जारके भी शिखामणि हैं।

अथ माहात्म्यम्

इति श्रीराधिकानाथसहस्रं नामकीर्तनम्।
स्मरणात्पापराशीनां खण्डनं मृत्युनाशनम्॥ १॥

वैष्णवानां प्रियकरं महारोगनिवारणम्।
ब्रह्महत्या सुरापानं परस्त्रीगमनं तथा॥ २॥

परद्रव्यापहरणं परद्वेषसमन्वितम्।
मानसं वाचिकं कायं यत्पापं पापसम्भवम्॥ ३॥

सहस्त्रनामपठनात्सर्वं नश्यति तत्क्षणात्।
महादारिद्र्ययुक्तो यो वैष्णवो विष्णुभक्तिमान्॥ ४॥
कार्तिक्यां सम्पठेद्रात्रौ शतमष्टोत्तरं क्रमात्।
पीताम्बरधरो धीमान्सुगन्धिपुष्पचन्दनैः॥ ५॥
पुस्तकं पूजयित्वा तु नैवेद्यादिभिरेव च।
राधाध्यानाङ्कितो धीरो वनमालाविभूषितः॥ ६॥
शतमष्टोत्तरं देवि पठेन्नामसहस्त्रकम्।
तुलसीमालया युक्तो वैष्णवो भक्तितत्परः॥ ७॥

रविवारे च शुक्रे च द्वादश्यां श्राद्धवासरे।
ब्राह्मणं पूजयित्वा च भोजयित्वा विधानतः॥ ८ ॥
यः पठेद्वैष्णवो नित्यं स याति हरिमन्दिरम्।
कृष्णेनोक्तं राधिकायै मयि प्रोक्तं पुरा शिवे॥ ९ ॥
नारदाय मया प्रोक्तं नारदेन प्रकाशितम्।
मया त्वयि वरारोहे प्रोक्तमेतत्सुदुर्लभम्॥ १० ॥
गोपनीयं प्रयत्नेन न प्रकाश्यं कथञ्चन।
शठाय पापिने चैव लम्पटाय विशेषतः॥ ११ ॥

न दातव्यं न दातव्यं न दातव्यं कदाचन।
देयं शिष्याय शान्ताय विष्णुभक्तिरताय च॥ १२॥
गोदानब्रह्मयज्ञादेर्वाजपेयशतस्य च।
अश्वमेधसहस्रस्य फलं पाठे भवेद् ध्रुवम्॥ १३॥
एकादश्यां नरः स्नात्वा सुगन्धिद्रव्यतैलकैः।
आहारं ब्राह्मणे दत्त्वा दक्षिणां स्वर्णभूषणम्॥ १४॥
तत आरम्भकर्ताऽस्मात् सर्वं प्राप्नोति मानवः।
शतावृत्तं सहस्रं च यः पठेद्वैष्णवो जनः॥ १५॥

श्रीवृन्दावनचन्द्रस्य प्रसादात्सर्वमाप्नुयात्।
यद्गृहे पुस्तकं देवि पूजितं चैव तिष्ठति॥ १६॥
न मारी न च दुर्भिक्षं नोपसर्गभयं क्वचित्।
सर्पादिभूतयक्षाद्या नश्यन्ति नात्र संशयः॥ १७॥
श्रीगोपालो महादेवि वसेत्तस्य गृहे सदा।
गृहे यत्र सहस्त्रं च नाम्नां तिष्ठति पूजितम्॥ १८॥

इति श्रीसम्मोहनतन्त्रे पार्वतीश्वरसंवादे श्रीगोपालसहस्त्रनामस्तोत्रस्य माहात्म्यं सम्पूर्णम्।

॥ श्रीगोपालाय नमः ॥

श्रीगोपालसहस्रनामावलिः

१ ॐ क्लीं देवाय नमः।
२ ॐ कामदेवाय नमः।
३ ॐ कामबीजशिरोमणये नमः।
४ ॐ श्रीगोपालाय नमः।
५ ॐ महीपालाय नमः।
६ ॐ सर्ववेदाङ्गपारगाय नमः।
७ ॐ धरणीपालकाय नमः।
८ ॐ धन्याय नमः।
९ ॐ पुण्डरीकाय नमः।
१० ॐ सनातनाय नमः।
११ ॐ गोपतये नमः।
१२ ॐ भूपतये नमः।
१३ ॐ शास्त्रे नमः।
१४ ॐ प्रहर्त्रे नमः।

१५ ॐ विश्वतोमुखाय नमः।
१६ ॐ आदिकर्त्रे नमः।
१७ ॐ महाकर्त्रे नमः।
१८ ॐ महाकालाय नमः।
१९ ॐ प्रतापवते नमः।
२० ॐ जगज्जीवाय नमः।
२१ ॐ जगद्धात्रे नमः।
२२ ॐ जगद्धर्त्रे नमः।
२३ ॐ जगद्वसवे नमः।
२४ ॐ मत्स्याय नमः।
२५ ॐ भीमाय नमः।
२६ ॐ कुहूभर्त्रे नमः।
२७ ॐ हर्त्रे नमः।
२८ ॐ वाराहमूर्तिमते नमः।
२९ ॐ नारायणाय नमः।
३० ॐ हृषीकेशाय नमः।
३१ ॐ गोविन्दाय नमः।
३२ ॐ गरुडध्वजाय नमः।

३३ ॐ गोकुलेन्द्राय नमः।
३४ ॐ महाचन्द्राय नमः।
३५ ॐ शर्वरीप्रियकारकाय नमः।
३६ ॐ कमलामुखलोलाक्षाय नमः।
३७ ॐ पुण्डरीकशुभावहाय नमः।
३८ ॐ दुर्वाससे नमः।
३९ ॐ कपिलाय नमः।
४० ॐ भौमाय नमः।
४१ ॐ सिन्धुसागरसङ्गमाय नमः।
४२ ॐ गोविन्दाय नमः।
४३ ॐ गोपतये नमः।
४४ ॐ गोत्राय नमः।
४५ ॐ कालिन्दीप्रेमपूरकाय नमः।
४६ ॐ गोपस्वामिने नमः।
४७ ॐ गोकुलेन्द्राय नमः।
४८ ॐ गोवर्धनवरप्रदाय नमः।
४९ ॐ नन्दादिगोकुलत्रात्रे नमः।
५० ॐ दात्रे नमः।

५१ ॐ दारिद्र्यभञ्जनाय नमः।
५२ ॐ सर्वमङ्गलदात्रे नमः।
५३ ॐ सर्वकामप्रदायकाय नमः।
५४ ॐ आदिकर्त्रे नमः।
५५ ॐ महीभर्त्रे नमः।
५६ ॐ सर्वसागरसिन्धुजाय नमः।
५७ ॐ गजगामिने नमः।
५८ ॐ गजोद्धारिणे नमः।
५९ ॐ कामिने नमः।
६० ॐ कामकलानिधये नमः।
६१ ॐ कलङ्करहिताय नमः।
६२ ॐ चन्द्राय नमः।
६३ ॐ बिम्बास्याय नमः।
६४ ॐ बिम्बसत्तमाय नमः।
६५ ॐ मालाकाराय नमः।
६६ ॐ कृपाकाराय नमः।
६७ ॐ कोकिलास्वरभूषणाय नमः।
६८ ॐ रामाय नमः।

६९ ॐ नीलाम्बराय नमः।
७० ॐ देवाय नमः।
७१ ॐ हलिने नमः।
७२ ॐ दुर्दममर्दनाय नमः।
७३ ॐ सहस्राक्षपुरीभेत्त्रे नमः।
७४ ॐ महामारीविनाशनाय नमः।
७५ ॐ शिवाय नमः।
७६ ॐ शिवतमाय नमः।
७७ ॐ भेत्त्रे नमः।
७८ ॐ बलारातिप्रपूजकाय नमः।
७९ ॐ कुमारीवरदायिने नमः।
८० ॐ वरेण्याय नमः।
८१ ॐ मीनकेतनाय नमः।
८२ ॐ नराय नमः।
८३ ॐ नारायणाय नमः।
८४ ॐ धीराय नमः।
८५ ॐ राधापतये नमः।
८६ ॐ उदारधिये नमः।

८७ ॐ श्रीपतये नमः।
८८ ॐ श्रीनिधये नमः।
८९ ॐ श्रीमते नमः।
९० ॐ मापतये नमः।
९१ ॐ प्रतिराजघ्ने नमः।
९२ ॐ वृन्दापतये नमः।
९३ ॐ कुलग्रामिणे नमः।
९४ ॐ धाम्ने नमः।
९५ ॐ ब्रह्मणे नमः।
९६ ॐ सनातनाय नमः।
९७ ॐ रेवतीरमणाय नमः।
९८ ॐ रामाय नमः।
९९ ॐ चञ्चलाय नमः।
१०० ॐ चारुलोचनाय नमः।
१०१ ॐ रामायणशरीराय नमः।
१०२ ॐ रामाय नमः।
१०३ ॐ रामाय नमः।
१०४ ॐ श्रियःपतये नमः।

१०५ ॐ शर्वराय नमः।
१०६ ॐ शर्वर्यै नमः।
१०७ ॐ शर्वाय नमः।
१०८ ॐ सर्वत्र शुभदायकाय नमः।
१०९ ॐ राधाराधयिताय नमः।
११० ॐ राधिने नमः।
१११ ॐ राधाचित्तप्रमोदकाय नमः।
११२ ॐ राधारतिसुखोपेताय नमः।
११३ ॐ राधामोहनतत्पराय नमः।
११४ ॐ राधावशीकराय नमः।
११५ ॐ राधाहृदयाम्भोजषट्पदाय नमः।
११६ ॐ राधालिङ्गनसम्मोहाय नमः।
११७ ॐ राधानर्तनकौतुकाय नमः।
११८ ॐ राधासञ्जातसम्प्रीतये नमः।
११९ ॐ राधाकामफलप्रदाय नमः।
१२० ॐ वृन्दापतये नमः।
१२१ ॐ कोशनिधये नमः।
१२२ ॐ कोकशोकविनाशकाय नमः।

१२३ ॐ चन्द्रापतये नमः।
१२४ ॐ चन्द्रपतये नमः।
१२५ ॐ चण्डकोदण्डभञ्जनाय नमः।
१२६ ॐ रामाय नमः।
१२७ ॐ दाशरथी रामाय नमः।
१२८ ॐ भृगुवंशसमुद्भवाय नमः।
१२९ ॐ आत्मारामाय नमः।
१३० ॐ जितक्रोधाय नमः।
१३१ ॐ मोहाय नमः।
१३२ ॐ मोहान्धभञ्जनाय नमः।
१३३ ॐ वृषभानवे नमः।
१३४ ॐ भवाय नमः।
१३५ ॐ भावाय नमः।
१३६ ॐ काश्यपये नमः।
१३७ ॐ करुणानिधये नमः।
१३८ ॐ कोलाहलाय नमः।
१३९ ॐ हलिने नमः।
१४० ॐ हालिने नमः।

१४१ ॐ हेलिने नमः।
१४२ ॐ हलधरप्रियाय नमः।
१४३ ॐ राधामुखाब्जमार्तण्डाय नमः।
१४४ ॐ भास्कराय नमः।
१४५ ॐ रविजाय नमः।
१४६ ॐ विधवे नमः।
१४७ ॐ विधये नमः।
१४८ ॐ विधात्रे नमः।
१४९ ॐ वरुणाय नमः।
१५० ॐ वारुणाय नमः।
१५१ ॐ वारुणीप्रियाय नमः।
१५२ ॐ रोहिणीहृदयानन्दिने नमः।
१५३ ॐ वसुदेवात्मजाय नमः।
१५४ ॐ बलिने नमः।
१५५ ॐ नीलाम्बराय नमः।
१५६ ॐ रौहिणेयाय नमः।
१५७ ॐ जरासन्धवधाय नमः।
१५८ ॐ अमलाय नमः।

१५९ ॐ नागाय नमः।
१६० ॐ नवाम्भसे नमः।
१६१ ॐ विरुदाय नमः।
१६२ ॐ वीरघ्ने नमः।
१६३ ॐ वरदाय नमः।
१६४ ॐ बलिने नमः।
१६५ ॐ गोपथाय नमः।
१६६ ॐ विजयिने नमः।
१६७ ॐ विदुषे नमः।
१६८ ॐ शिपिविष्टाय नमः।
१६९ ॐ सनातनाय नमः।
१७० ॐ परशुरामवचोग्राहिणे नमः।
१७१ ॐ वरग्राहिणे नमः।
१७२ ॐ शृगालघ्ने नमः।
१७३ ॐ दमघोषोपदेष्ट्रे नमः।
१७४ ॐ रथग्राहिणे नमः।
१७५ ॐ सुदर्शनाय नमः।
१७६ ॐ वीरपत्नीयशस्त्रात्रे नमः।

१७७ ॐ जराव्याधिविघातकाय नमः।
१७८ ॐ द्वारकावासतत्त्वज्ञाय नमः।
१७९ ॐ हुताशनवरप्रदाय नमः।
१८० ॐ यमुनावेगसंहारिणे नमः।
१८१ ॐ नीलाम्बरधराय नमः।
१८२ ॐ प्रभवे नमः।
१८३ ॐ विभवे नमः।
१८४ ॐ शरासनाय नमः।
१८५ ॐ धन्विने नमः।
१८६ ॐ गणेशाय नमः।
१८७ ॐ गणनायकाय नमः।
१८८ ॐ लक्ष्मणाय नमः।
१८९ ॐ लक्षणाय नमः।
१९० ॐ लक्ष्याय नमः।
१९१ ॐ रक्षोवंशविनाशनाय नमः।
१९२ ॐ वामनाय नमः।
१९३ ॐ वामनीभूताय नमः।
१९४ ॐ वमनाय नमः।

१९५ ॐ वमनारुहाय नमः।
१९६ ॐ यशोदानन्दनाय नमः।
१९७ ॐ कर्त्रे नमः।
१९८ ॐ यमलार्जुनमुक्तिदाय नमः।
१९९ ॐ उलूखलिने नमः।
२०० ॐ महामानिने नमः।
२०१ ॐ दामबद्धाह्वयिने नमः।
२०२ ॐ शमिने नमः।
२०३ ॐ भक्तानुकारिणे नमः।
२०४ ॐ भगवते नमः।
२०५ ॐ केशवाय नमः।
२०६ ॐ अचलधारकाय नमः।
२०७ ॐ केशिघ्ने नमः।
२०८ ॐ मधुघ्ने नमः।
२०९ ॐ मोहिने नमः।
२१० ॐ वृषासुरविघातकाय नमः।
२११ ॐ अघासुरविनाशिने नमः।
२१२ ॐ पूतनामोक्षदायकाय नमः।

२१३ ॐ कुब्जाविनोदिने नमः।
२१४ ॐ भगवते नमः।
२१५ ॐ कंसमृत्यवे नमः।
२१६ ॐ महामखिने नमः।
२१७ ॐ अश्वमेधाय नमः।
२१८ ॐ वाजपेयाय नमः।
२१९ ॐ गोमेधाय नमः।
२२० ॐ नरमेधवते नमः।
२२१ ॐ कन्दर्पकोटिलावण्याय नमः।
२२२ ॐ चन्द्रकोटिसुशीतलाय नमः।
२२३ ॐ रविकोटिप्रतीकाशाय नमः।
२२४ ॐ वायुकोटिमहाबलाय नमः।
२२५ ॐ ब्रह्मणे नमः।
२२६ ॐ ब्रह्माण्डकर्त्रे नमः।
२२७ ॐ कमलावाञ्छितप्रदाय नमः।
२२८ ॐ कमलाय नमः।
२२९ ॐ कमलाक्षाय नमः।
२३० ॐ कमलामुखलोलुपाय नमः।

२३१ ॐ कमलाव्रतधारिणे नमः।
२३२ ॐ कमलाभाय नमः।
२३३ ॐ पुरन्दराय नमः।
२३४ ॐ सौभाग्याधिकचित्ताय नमः।
२३५ ॐ महामायिने नमः।
२३६ ॐ महोत्कटाय नमः।
२३७ ॐ तारकारये नमः।
२३८ ॐ सुरत्रात्रे नमः।
२३९ ॐ मारीचक्षोभकारकाय नमः।
२४० ॐ विश्वामित्रप्रियाय नमः।
२४१ ॐ दान्ताय नमः।
२४२ ॐ रामाय नमः।
२४३ ॐ राजीवलोचनाय नमः।
२४४ ॐ लङ्काधिपकुलध्वंसिने नमः।
२४५ ॐ विभीषणवरप्रदाय नमः।
२४६ ॐ सीतानन्दकराय नमः।
२४७ ॐ रामाय नमः।
२४८ ॐ वीराय नमः।

२४९ ॐ वारिधिबन्धनाय नमः।
२५० ॐ खरदूषणसंहारिणे नमः।
२५१ ॐ साकेतपुरवासनाय नमः।
२५२ ॐ चन्द्रावलीपतये नमः।
२५३ ॐ कूलाय नमः।
२५४ ॐ केशिने नमः।
२५५ ॐ कंसवधाय नमः।
२५६ ॐ अमराय नमः।
२५७ ॐ माधवाय नमः।
२५८ ॐ मधुघ्ने नमः।
२५९ ॐ माध्विने नमः।
२६० ॐ माध्वीकाय नमः।
२६१ ॐ माधवाय नमः।
२६२ ॐ मधवे नमः।
२६३ ॐ मुञ्जाटवीगाहमानाय नमः।
२६४ ॐ धेनुकारये नमः।
२६५ ॐ धरात्मजाय नमः।
२६६ ॐ वंशीवटविहारिणे नमः।

२६७ ॐ गोवर्धनवनाश्रयाय नमः।
२६८ ॐ तालवनोद्देशिने नमः।
२६९ ॐ भाण्डीरवनशंखघ्ने नमः।
२७० ॐ तृणावर्तकथाकारिणे नमः।
२७१ ॐ वृषभानुसुतापतये नमः।
२७२ ॐ राधाप्राणसमाय नमः।
२७३ ॐ राधावदनाब्जमधुव्रताय नमः।
२७४ ॐ गोपीरञ्जनदैवज्ञाय नमः।
२७५ ॐ लीलाकमलपूजिताय नमः।
२७६ ॐ क्रीडाकमलसंदोहाय नमः।
२७७ ॐ गोपिकाप्रीतिरञ्जनाय नमः।
२७८ ॐ रञ्जकाय नमः।
२७९ ॐ रञ्जनाय नमः।
२८० ॐ रङ्गाय नमः।
२८१ ॐ रङ्गिणे नमः।
२८२ ॐ रङ्गमहीरुहाय नमः।
२८३ ॐ कामाय नमः।
२८४ ॐ कामारिभक्ताय नमः।

२८५ ॐ पुराणपुरुषाय नमः।
२८६ ॐ कवये नमः।
२८७ ॐ नारदाय नमः।
२८८ ॐ देवलाय नमः।
२८९ ॐ भीमाय नमः।
२९० ॐ बालाय नमः।
२९१ ॐ बालमुखाम्बुजाय नमः।
२९२ ॐ अम्बुजाय नमः।
२९३ ॐ ब्रह्मसाक्षिणे नमः।
२९४ ॐ योगिने नमः।
२९५ ॐ दत्तवराय नमः।
२९६ ॐ मुनये नमः।
२९७ ॐ ऋषभाय नमः।
२९८ ॐ पर्वताय नमः।
२९९ ॐ ग्रामाय नमः।
३०० ॐ नदीपवनवल्लभाय नमः।
३०१ ॐ पद्मनाभाय नमः।
३०२ ॐ सुरज्येष्ठाय नमः।

३०३ ॐ ब्रह्मणे नमः।
३०४ ॐ रुद्राय नमः।
३०५ ॐ अहिभूषिताय नमः।
३०६ ॐ गणानां त्राणकर्त्रे नमः।
३०७ ॐ गणेशाय नमः।
३०८ ॐ ग्रहिलाय नमः।
३०९ ॐ ग्रहिणे नमः।
३१० ॐ गणाश्रयाय नमः।
३११ ॐ गणाध्यक्षाय नमः।
३१२ ॐ क्रोडीकृतजगत्त्रयाय नमः।
३१३ ॐ यादवेन्द्राय नमः।
३१४ ॐ द्वारकेन्द्राय नमः।
३१५ ॐ मथुरावल्लभाय नमः।
३१६ ॐ धुरिणे नमः।
३१७ ॐ भ्रमराय नमः।
३१८ ॐ कुन्तलिने नमः।
३१९ ॐ कुन्तीसुतरक्षिणे नमः।
३२० ॐ महामखिने नमः।

३२१ ॐ यमुनावरदात्रे नमः।
३२२ ॐ काश्यपस्य वरप्रदाय नमः।
३२३ ॐ शङ्खचूडवधोद्दामाय नमः।
३२४ ॐ गोपीरक्षणतत्पराय नमः।
३२५ ॐ पाञ्चजन्यकराय नमः।
३२६ ॐ रामिणे नमः।
३२७ ॐ त्रिरामिणे नमः।
३२८ ॐ वनजाय नमः।
३२९ ॐ जयाय नमः।
३३० ॐ फाल्गुनाय नमः।
३३१ ॐ फाल्गुनसखाय नमः।
३३२ ॐ विराधवधकारकाय नमः।
३३३ ॐ रुक्मिणीप्राणनाथाय नमः।
३३४ ॐ सत्यभामाप्रियङ्कराय नमः।
३३५ ॐ कल्पवृक्षाय नमः।
३३६ ॐ महावृक्षाय नमः।
३३७ ॐ दानवृक्षाय नमः।
३३८ ॐ महाफलाय नमः।

३३९ ॐ अंकुशाय नमः।
३४० ॐ भूसुराय नमः।
३४१ ॐ भामाय नमः।
३४२ ॐ भामकाय नमः।
३४३ ॐ भ्रामकाय नमः।
३४४ ॐ हरये नमः।
३४५ ॐ सरलाय नमः।
३४६ ॐ शाश्वताय नमः।
३४७ ॐ वीराय नमः।
३४८ ॐ यदुवंशिने नमः।
३४९ ॐ शिवात्मकाय नमः।
३५० ॐ प्रद्युम्नाय नमः।
३५१ ॐ बलकर्त्रे नमः।
३५२ ॐ प्रहर्त्रे नमः।
३५३ ॐ दैत्यघ्ने नमः।
३५४ ॐ प्रभवे नमः।
३५५ ॐ महाधनाय नमः।
३५६ ॐ महावीराय नमः।

३५७ ॐ वनमालाविभूषणाय नमः।
३५८ ॐ तुलसीदामशोभाढ्याय नमः।
३५९ ॐ जालन्धरविनाशनाय नमः।
३६० ॐ शूराय नमः।
३६१ ॐ सूर्याय नमः।
३६२ ॐ मृकण्डाय नमः।
३६३ ॐ भास्कराय नमः।
३६४ ॐ विश्वपूजिताय नमः।
३६५ ॐ रवये नमः।
३६६ ॐ तमोघ्ने नमः।
३६७ ॐ वह्नये नमः।
३६८ ॐ वाडवाय नमः।
३६९ ॐ वडवानलाय नमः।
३७० ॐ दैत्यदर्पविनाशिने नमः।
३७१ ॐ गरुडाय नमः।
३७२ ॐ गरुडाग्रजाय नमः।
३७३ ॐ गोपीनाथाय नमः।
३७४ ॐ महीनाथाय नमः।

३७५ ॐ वृन्दानाथाय नमः।
३७६ ॐ अवरोधकाय नमः।
३७७ ॐ प्रपञ्चिने नमः।
३७८ ॐ पञ्चरूपाय नमः।
३७९ ॐ लतागुल्माय नमः।
३८० ॐ गोपतये नमः।
३८१ ॐ गङ्गारूपाय नमः।
३८२ ॐ यमुनारूपाय नमः।
३८३ ॐ गोदारूपाय नमः।
३८४ ॐ वेत्रवतीरूपाय नमः।
३८५ ॐ कावेरीरूपाय नमः।
३८६ ॐ नर्मदारूपाय नमः।
३८७ ॐ तापीरूपाय नमः।
३८८ ॐ गण्डकीरूपाय नमः।
३८९ ॐ सरयूरूपाय नमः।
३९० ॐ राजसाय नमः।
३९१ ॐ तामसाय नमः।
३९२ ॐ सत्त्विने नमः।

३९३ ॐ सर्वाङ्गिणे नमः।
३९४ ॐ सर्वलोचनाय नमः।
३९५ ॐ सुधामयाय नमः।
३९६ ॐ अमृतमयाय नमः।
३९७ ॐ योगिनीवल्लभाय नमः।
३९८ ॐ शिवाय नमः।
३९९ ॐ बुद्धाय नमः।
४०० ॐ बुद्धिमतां श्रेष्ठाय नमः।
४०१ ॐ विष्णवे नमः।
४०२ ॐ जिष्णवे नमः।
४०३ ॐ शचीपतये नमः।
४०४ ॐ वंशिने नमः।
४०५ ॐ वंशधराय नमः।
४०६ ॐ लोकाय नमः।
४०७ ॐ विलोकाय नमः।
४०८ ॐ मोहनाशनाय नमः।
४०९ ॐ रवरावाय नमः।
४१० ॐ रवाय नमः।

४११ ॐ रावाय नमः।
४१२ ॐ बालाय नमः।
४१३ ॐ बालबलाहकाय नमः।
४१४ ॐ शिवाय नमः।
४१५ ॐ रुद्राय नमः।
४१६ ॐ नलाय नमः।
४१७ ॐ नीलाय नमः।
४१८ ॐ लाङ्गलिने नमः।
४१९ ॐ लाङ्गलाश्रयाय नमः।
४२० ॐ पारदाय नमः।
४२१ ॐ पावनाय नमः।
४२२ ॐ हंसाय नमः।
४२३ ॐ हंसारूढाय नमः।
४२४ ॐ जगत्पतये नमः।
४२५ ॐ मोहिनीमोहनाय नमः।
४२६ ॐ मायिने नमः।
४२७ ॐ महामायाय नमः।
४२८ ॐ महामखिने नमः।

४२९ ॐ वृषाय नमः।
४३० ॐ वृषाकपये नमः।
४३१ ॐ कालाय नमः।
४३२ ॐ कालीदमनकारकाय नमः।
४३३ ॐ कुब्जाभाग्यप्रदाय नमः।
४३४ ॐ वीराय नमः।
४३५ ॐ रजकक्षयकारकाय नमः।
४३६ ॐ कोमलाय नमः।
४३७ ॐ वारुणाय नमः।
४३८ ॐ राज्ञे नमः।
४३९ ॐ जलजाय नमः।
४४० ॐ जलधारकाय नमः।
४४१ ॐ हारकाय नमः।
४४२ ॐ सर्वपापघ्नाय नमः।
४४३ ॐ परमेष्ठिने नमः।
४४४ ॐ पितामहाय नमः।
४४५ ॐ खड्गधारिणे नमः।
४४६ ॐ कृपाकारिणे नमः।

४४७ ॐ राधारमणसुन्दराय नमः।
४४८ ॐ द्वादशारण्यसम्भोगिने नमः।
४४९ ॐ शेषनागफणालयाय नमः।
४५० ॐ कामाय नमः।
४५१ ॐ श्यामाय नमः।
४५२ ॐ सुखाय नमः।
४५३ ॐ श्रीदाय नमः।
४५४ ॐ श्रीपतये नमः।
४५५ ॐ श्रीनिधये नमः।
४५६ ॐ कृतये नमः।
४५७ ॐ हरये नमः।
४५८ ॐ हराय नमः।
४५९ ॐ नराय नमः।
४६० ॐ नाराय नमः।
४६१ ॐ नरोत्तमाय नमः।
४६२ ॐ इषुप्रियाय नमः।
४६३ ॐ गोपालीचित्तहर्त्रे नमः।
४६४ ॐ कर्त्रे नमः।

४६५ ॐ संसारतारकाय नमः।
४६६ ॐ आदिदेवाय नमः।
४६७ ॐ महादेवाय नमः।
४६८ ॐ गौरीगुरवे नमः।
४६९ ॐ अनाश्रयाय नमः।
४७० ॐ साधवे नमः।
४७१ ॐ मधवे नमः।
४७२ ॐ विधवे नमः।
४७३ ॐ धात्रे नमः।
४७४ ॐ भ्रात्रे नमः।
४७५ ॐ क्रूरपरायणाय नमः।
४७६ ॐ रोलम्बिने नमः।
४७७ ॐ हयग्रीवाय नमः।
४७८ ॐ वानरारये नमः।
४७९ ॐ वनाश्रयाय नमः।
४८० ॐ वनाय नमः।
४८१ ॐ वनिने नमः।
४८२ ॐ वनाध्यक्षाय नमः।

४८३ ॐ महावन्द्याय नमः।
४८४ ॐ महामुनये नमः।
४८५ ॐ स्यमन्तकमणिप्राज्ञाय नमः।
४८६ ॐ विज्ञाय नमः।
४८७ ॐ विघ्नविघातकाय नमः।
४८८ ॐ गोवर्धनाय नमः।
४८९ ॐ वर्धनीयाय नमः।
४९० ॐ वर्धन्यै नमः।
४९१ ॐ वर्धनप्रियाय नमः।
४९२ ॐ वर्धन्याय नमः।
४९३ ॐ वर्धनाय नमः।
४९४ ॐ वर्धिने नमः।
४९५ ॐ वार्धिन्याय नमः।
४९६ ॐ सुमुखप्रियाय नमः।
४९७ ॐ वर्धिताय नमः।
४९८ ॐ वृद्धकाय नमः।
४९९ ॐ वृद्धाय नमः।
५०० ॐ वृन्दारकजनप्रियाय नमः।

५०१ ॐ गोपालरमणीभर्त्रे नमः।
५०२ ॐ साम्बकुष्ठविनाशनाय नमः।
५०३ ॐ रुक्मिणीहरणाय नमः।
५०४ ॐ प्रेम्णे नमः।
५०५ ॐ प्रेमिणे नमः।
५०६ ॐ चन्द्रावलीपतये नमः।
५०७ ॐ श्रीकर्त्रे नमः।
५०८ ॐ विश्वभर्त्रे नमः।
५०९ ॐ नराय नमः।
५१० ॐ नारायणाय नमः।
५११ ॐ बलिने नमः।
५१२ ॐ गणाय नमः।
५१३ ॐ गणपतये नमः।
५१४ ॐ दत्तात्रेयाय नमः।
५१५ ॐ महामुनये नमः।
५१६ ॐ व्यासाय नमः।
५१७ ॐ नारायणाय नमः।
५१८ ॐ दिव्याय नमः।

५१९ ॐ भव्याय नमः।
५२० ॐ भावुकधारकाय नमः।
५२१ ॐ स्वःश्रेयसे नमः।
५२२ ॐ शिवाय नमः।
५२३ ॐ भद्राय नमः।
५२४ ॐ भावुकाय नमः।
५२५ ॐ भविकाय नमः।
५२६ ॐ शुभाय नमः।
५२७ ॐ शुभात्मकाय नमः।
५२८ ॐ शुभाय नमः।
५२९ ॐ शास्त्रे नमः।
५३० ॐ प्रशास्त्रे नमः।
५३१ ॐ मेघनादघ्ने नमः।
५३२ ॐ ब्रह्मण्यदेवाय नमः।
५३३ ॐ दीनानामुद्धारकरणक्षमाय नमः।
५३४ ॐ कृष्णाय नमः।
५३५ ॐ कमलपत्राक्षाय नमः।
५३६ ॐ कृष्णाय नमः।

५३७ ॐ कमललोचनाय नमः।
५३८ ॐ कृष्णाय नमः।
५३९ ॐ कामिने नमः।
५४० ॐ सदाकृष्णाय नमः।
५४१ ॐ समस्तप्रियकारकाय नमः।
५४२ ॐ नन्दाय नमः।
५४३ ॐ नन्दिने नमः।
५४४ ॐ महानन्दिने नमः।
५४५ ॐ मादिने नमः।
५४६ ॐ मादनकाय नमः।
५४७ ॐ किलिने नमः।
५४८ ॐ मिलिने नमः।
५४९ ॐ ह्रिलिने नमः।
५५० ॐ गिलिने नमः।
५५१ ॐ गोलिने नमः।
५५२ ॐ गोलाय नमः।
५५३ ॐ गोलालयाय नमः।
५५४ ॐ गुलिने नमः।

५५५ ॐ गुग्गुलिने नमः।
५५६ ॐ मारकिने नमः।
५५७ ॐ शाखिने नमः।
५५८ ॐ वटाय नमः।
५५९ ॐ पिप्पलकाय नमः।
५६० ॐ कृतिने नमः।
५६१ ॐ म्लेच्छघ्ने नमः।
५६२ ॐ कालहर्त्रे नमः।
५६३ ॐ यशोदायशसे नमः।
५६४ ॐ अच्युताय नमः।
५६५ ॐ केशवाय नमः।
५६६ ॐ विष्णवे नमः।
५६७ ॐ हरये नमः।
५६८ ॐ सत्याय नमः।
५६९ ॐ जनार्दनाय नमः।
५७० ॐ हंसाय नमः।
५७१ ॐ नारायणाय नमः।
५७२ ॐ लीलाय नमः।

५७३ ॐ नीलाय नमः।
५७४ ॐ भक्तिपरायणाय नमः।
५७५ ॐ जानकीवल्लभाय नमः।
५७६ ॐ रामाय नमः।
५७७ ॐ विरामाय नमः।
५७८ ॐ विघ्ननाशनाय नमः।
५७९ ॐ सहस्त्रांशवे नमः।
५८० ॐ महाभानवे नमः।
५८१ ॐ वीरबाहवे नमः।
५८२ ॐ महोदधये नमः।
५८३ ॐ समुद्राय नमः।
५८४ ॐ अब्धये नमः।
५८५ ॐ अकूपाराय नमः।
५८६ ॐ पारावाराय नमः।
५८७ ॐ सरित्पतये नमः।
५८८ ॐ गोकुलानन्दकारिणे नमः।
५८९ ॐ प्रतिज्ञापरिपालकाय नमः।
५९० ॐ सदारामाय नमः।

५९१ ॐ कृपारामाय नमः।
५९२ ॐ महारामाय नमः।
५९३ ॐ धनुर्धराय नमः।
५९४ ॐ पर्वताय नमः।
५९५ ॐ पर्वताकाराय नमः।
५९६ ॐ गयाय नमः।
५९७ ॐ गेयाय नमः।
५९८ ॐ द्विजप्रियाय नमः।
५९९ ॐ कम्बलाश्वतराय नमः।
६०० ॐ रामाय नमः।
६०१ ॐ रामायणप्रवर्तकाय नमः।
६०२ ॐ दिवे नमः।
६०३ ॐ दिवाय नमः।
६०४ ॐ दिवसाय नमः।
६०५ ॐ दिव्याय नमः।
६०६ ॐ भव्याय नमः।
६०७ ॐ भाविभयापहाय नमः।
६०८ ॐ पार्वतीभाग्यसहिताय नमः।

६०९ ॐ भ्रात्रे नमः।
६१० ॐ लक्ष्मीविलासवते नमः।
६११ ॐ विलासिने नमः।
६१२ ॐ साहसिने नमः।
६१३ ॐ सर्विणे नमः।
६१४ ॐ गर्विणे नमः।
६१५ ॐ गर्वितलोचनाय नमः।
६१६ ॐ मुरारये नमः।
६१७ ॐ लोकधर्मज्ञाय नमः।
६१८ ॐ जीवनाय नमः।
६१९ ॐ जीवनान्तकाय नमः।
६२० ॐ यमाय नमः।
६२१ ॐ यमारये नमः।
६२२ ॐ यमनाय नमः।
६२३ ॐ यामिने नमः।
६२४ ॐ यामविधायकाय नमः।
६२५ ॐ वसुलिने नमः।
६२६ ॐ पांसुलिने नमः।

६२७ ॐ पांसवे नमः।
६२८ ॐ पाण्डवे नमः।
६२९ ॐ अर्जुनवल्लभाय नमः।
६३० ॐ ललिताचन्द्रिकामालिने नमः।
६३१ ॐ मालिने नमः।
६३२ ॐ मालाम्बुजाश्रयाय नमः।
६३३ ॐ अम्बुजाक्षाय नमः।
६३४ ॐ महायक्षाय नमः।
६३५ ॐ दक्षाय नमः।
६३६ ॐ चिन्तामणये नमः।
६३७ ॐ प्रभवे नमः।
६३८ ॐ मणये नमः।
६३९ ॐ दिनमणये नमः।
६४० ॐ केदाराय नमः।
६४१ ॐ बदराश्रयाय नमः।
६४२ ॐ बदरीवनसम्प्रीताय नमः।
६४३ ॐ व्यासाय नमः।
६४४ ॐ सत्यवतीसुताय नमः।

६४५ ॐ अमरारिनिहन्त्रे नमः।
६४६ ॐ सुधासिन्धवे नमः।
६४७ ॐ विधूदयाय नमः।
६४८ ॐ चन्द्राय नमः।
६४९ ॐ रवये नमः।
६५० ॐ शिवाय नमः।
६५१ ॐ शूलिने नमः।
६५२ ॐ चक्रिणे नमः।
६५३ ॐ गदाधराय नमः।
६५४ ॐ श्रीकर्त्रे नमः।
६५५ ॐ श्रीपतये नमः।
६५६ ॐ श्रीदाय नमः।
६५७ ॐ श्रीदेवाय नमः।
६५८ ॐ देवकीसुताय नमः।
६५९ ॐ श्रीपतये नमः।
६६० ॐ पुण्डरीकाक्षाय नमः।
६६१ ॐ पद्मनाभाय नमः।
६६२ ॐ जगत्पतये नमः।

६६३ ॐ वासुदेवाय नमः।
६६४ ॐ अप्रमेयात्मने नमः।
६६५ ॐ केशवाय नमः।
६६६ ॐ गरुडध्वजाय नमः।
६६७ ॐ नारायणाय नमः।
६६८ ॐ परस्मै धाम्ने नमः।
६६९ ॐ देवदेवाय नमः।
६७० ॐ महेश्वराय नमः।
६७१ ॐ चक्रपाणये नमः।
६७२ ॐ कलापूर्णाय नमः।
६७३ ॐ वेदवेद्याय नमः।
६७४ ॐ दयानिधये नमः।
६७५ ॐ भगवते नमः।
६७६ ॐ सर्वभूतेशाय नमः।
६७७ ॐ गोपालाय नमः।
६७८ ॐ सर्वपालकाय नमः।
६७९ ॐ अनन्ताय नमः।
६८० ॐ निर्गुणाय नमः।

६८१ ॐ अनन्ताय नमः।
६८२ ॐ निर्विकल्पाय नमः।
६८३ ॐ निरञ्जनाय नमः।
६८४ ॐ निराधाराय नमः।
६८५ ॐ निराकाराय नमः।
६८६ ॐ निराभासाय नमः।
६८७ ॐ निराश्रयाय नमः।
६८८ ॐ पुरुषाय नमः।
६८९ ॐ प्रणवातीताय नमः।
६९० ॐ मुकुन्दाय नमः।
६९१ ॐ परमेश्वराय नमः।
६९२ ॐ क्षणावनये नमः।
६९३ ॐ सार्वभौमाय नमः।
६९४ ॐ वैकुण्ठाय नमः।
६९५ ॐ भक्तवत्सलाय नमः।
६९६ ॐ विष्णवे नमः।
६९७ ॐ दामोदराय नमः।
६९८ ॐ कृष्णाय नमः।

६९९ ॐ माधवाय नमः।
७०० ॐ मथुरापतये नमः।
७०१ ॐ देवकीगर्भसम्भूताय नमः।
७०२ ॐ यशोदावत्सलाय नमः।
७०३ ॐ हरये नमः।
७०४ ॐ शिवाय नमः।
७०५ ॐ संकर्षणाय नमः।
७०६ ॐ शम्भवे नमः।
७०७ ॐ भूतनाथाय नमः।
७०८ ॐ दिवस्पतये नमः।
७०९ ॐ अव्ययाय नमः।
७१० ॐ सर्वधर्मज्ञाय नमः।
७११ ॐ निर्मलाय नमः।
७१२ ॐ निरुपद्रवाय नमः।
७१३ ॐ निर्वाणनायकाय नमः।
७१४ ॐ नित्याय नमः।
७१५ ॐ नीलजीमूतसंनिभाय नमः।
७१६ ॐ कलाक्षयाय नमः।

७१७ ॐ सर्वज्ञाय नमः।
७१८ ॐ कमलारूपतत्पराय नमः।
७१९ ॐ हृषीकेशाय नमः।
७२० ॐ पीतवाससे नमः।
७२१ ॐ वसुदेवप्रियात्मजाय नमः।
७२२ ॐ नन्दगोपकुमारार्याय नमः।
७२३ ॐ नवनीताशनाय नमः।
७२४ ॐ प्रभवे नमः।
७२५ ॐ पुराणपुरुषाय नमः।
७२६ ॐ श्रेष्ठाय नमः।
७२७ ॐ शङ्खपाणये नमः।
७२८ ॐ सुविक्रमाय नमः।
७२९ ॐ अनिरुद्धाय नमः।
७३० ॐ चक्ररथाय नमः।
७३१ ॐ शार्ङ्गपाणये नमः।
७३२ ॐ चतुर्भुजाय नमः।
७३३ ॐ गदाधराय नमः।
७३४ ॐ सुरार्तिघ्नाय नमः।

७३५ ॐ गोविन्दाय नमः।
७३६ ॐ नन्दकायुधाय नमः।
७३७ ॐ वृन्दावनचराय नमः।
७३८ ॐ शौरये नमः।
७३९ ॐ वेणुवाद्यविशारदाय नमः।
७४० ॐ तृणावर्तान्तकाय नमः।
७४१ ॐ भीमाय नमः।
७४२ ॐ साहसाय नमः।
७४३ ॐ बहुविक्रमाय नमः।
७४४ ॐ शकटासुरसंहारिणे नमः।
७४५ ॐ बकासुरविनाशनाय नमः।
७४६ ॐ धेनुकासुरसंघाताय नमः।
७४७ ॐ पूतनारये नमः।
७४८ ॐ नृकेसरिणे नमः।
७४९ ॐ पितामहाय नमः।
७५० ॐ गुरवे नमः।
७५१ ॐ साक्षिणे नमः।
७५२ ॐ प्रत्यगात्मने नमः।

७५३ ॐ सदाशिवाय नमः।
७५४ ॐ अप्रमेयाय नमः।
७५५ ॐ प्रभवे नमः।
७५६ ॐ प्राज्ञाय नमः।
७५७ ॐ अप्रतर्क्याय नमः।
७५८ ॐ स्वप्नवर्धनाय नमः।
७५९ ॐ धन्याय नमः।
७६० ॐ मान्याय नमः।
७६१ ॐ भवाय नमः।
७६२ ॐ भावाय नमः।
७६३ ॐ धीराय नमः।
७६४ ॐ शान्ताय नमः।
७६५ ॐ जगद्गुरवे नमः।
७६६ ॐ अन्तर्यामिणे नमः।
७६७ ॐ ईश्वराय नमः।
७६८ ॐ दिव्याय नमः।
७६९ ॐ दैवज्ञाय नमः।
७७० ॐ देवतागुरवे नमः।

७७१ ॐ क्षीराब्धिशयनाय नमः।
७७२ ॐ धात्रे नमः।
७७३ ॐ लक्ष्मीवते नमः।
७७४ ॐ लक्ष्मणाग्रजाय नमः।
७७५ ॐ धात्रीपतये नमः।
७७६ ॐ अमेयात्मने नमः।
७७७ ॐ चन्द्रशेखरपूजिताय नमः।
७७८ ॐ लोकसाक्षिणे नमः।
७७९ ॐ जगच्चक्षुषे नमः।
७८० ॐ पुण्यचारित्रकीर्तनाय नमः।
७८१ ॐ कोटिमन्मथसौन्दर्याय नमः।
७८२ ॐ जगन्मोहनविग्रहाय नमः।
७८३ ॐ मन्दस्मिततमाय नमः।
७८४ ॐ गोपाय नमः।
७८५ ॐ गोपिकापरिवेष्टिताय नमः।
७८६ ॐ फुल्लारविन्दनयनाय नमः।
७८७ ॐ चाणूरान्ध्रनिषूदनाय नमः।
७८८ ॐ इन्दीवरदलश्यामाय नमः।

७८९ ॐ बर्हिबर्हावतंसकाय नमः।
७९० ॐ मुरलीनिनदाह्लादाय नमः।
७९१ ॐ दिव्यमाल्याम्बराश्रयाय नमः।
७९२ ॐ सुकपोलयुगाय नमः।
७९३ ॐ सुभ्रूयुगलाय नमः।
७९४ ॐ सुललाटकाय नमः।
७९५ ॐ कम्बुग्रीवाय नमः।
७९६ ॐ विशालाक्षाय नमः।
७९७ ॐ लक्ष्मीवते नमः।
७९८ ॐ शुभलक्षणाय नमः।
७९९ ॐ पीनवक्षसे नमः।
८०० ॐ चतुर्बाहवे नमः।
८०१ ॐ चतुर्मूर्तये नमः।
८०२ ॐ त्रिविक्रमाय नमः।
८०३ ॐ कलङ्करहिताय नमः।
८०४ ॐ शुद्धाय नमः।
८०५ ॐ दुष्टशत्रुनिबर्हणाय नमः।
८०६ ॐ किरीटकुण्डलधराय नमः।

८०७ ॐ कटकाङ्गदमण्डिताय नमः।
८०८ ॐ मुद्रिकाभरणोपेताय नमः।
८०९ ॐ कटिसूत्रविराजिताय नमः।
८१० ॐ मञ्जीररञ्जितपदाय नमः।
८११ ॐ सर्वाभरणभूषिताय नमः।
८१२ ॐ विन्यस्तपादयुगलाय नमः।
८१३ ॐ दिव्यमङ्गलविग्रहाय नमः।
८१४ ॐ गोपिकानयनानन्दाय नमः।
८१५ ॐ पूर्णचन्द्रनिभाननाय नमः।
८१६ ॐ समस्तजगदानन्दाय नमः।
८१७ ॐ सुन्दराय नमः।
८१८ ॐ लोकनन्दनाय नमः।
८१९ ॐ यमुनातीरसञ्चारिणे नमः।
८२० ॐ राधामन्मथवैभवाय नमः।
८२१ ॐ गोपनारीप्रियाय नमः।
८२२ ॐ दान्ताय नमः।
८२३ ॐ गोपीवस्त्रापहारकाय नमः।
८२४ ॐ शृङ्गारमूर्तये नमः।

८२५ ॐ श्रीधाम्ने नमः।
८२६ ॐ तारकाय नमः।
८२७ ॐ मूलकारणाय नमः।
८२८ ॐ सृष्टिसंरक्षणोपायाय नमः।
८२९ ॐ क्रूरासुरविभञ्जनाय नमः।
८३० ॐ नरकासुरहारिणे नमः।
८३१ ॐ मुरारये नमः।
८३२ ॐ वैरिमर्दनाय नमः।
८३३ ॐ आदितेयप्रियाय नमः।
८३४ ॐ दैत्यभीकराय नमः।
८३५ ॐ इन्दुशेखराय नमः।
८३६ ॐ जरासन्धकुलध्वंसिने नमः।
८३७ ॐ कंसारातये नमः।
८३८ ॐ सुविक्रमाय नमः।
८३९ ॐ पुण्यश्लोकाय नमः।
८४० ॐ कीर्तनीयाय नमः।
८४१ ॐ यादवेन्द्राय नमः।

८४२ ॐ जगन्नुताय नमः।
८४३ ॐ रुक्मिणीरमणाय नमः।
८४४ ॐ सत्यभामाजाम्बवतीप्रियाय नमः।
८४५ ॐ मित्रविन्दानाग्नजिती-लक्ष्मणासमुपासिताय नमः।
८४६ ॐ सुधाकरकुले जाताय नमः।
८४७ ॐ अनन्तप्रबलविक्रमाय नमः।
८४८ ॐ सर्वसौभाग्यसम्पन्नाय नमः।
८४९ ॐ द्वारकायामुपस्थिताय नमः।
८५० ॐ भद्रासूर्यसुतानाथाय नमः।
८५१ ॐ लीलामानुषविग्रहाय नमः।
८५२ ॐ सहस्रषोडशस्त्रीशाय नमः।
८५३ ॐ भोगमोक्षैकदायकाय नमः।
८५४ ॐ वेदान्तवेद्याय नमः।
८५५ ॐ संवेद्याय नमः।
८५६ ॐ वैद्यब्रह्माण्डनायकाय नमः।
८५७ ॐ गोवर्धनधराय नमः।

८५८ ॐ नाथाय नमः।
८५९ ॐ सर्वजीवदयापराय नमः।
८६० ॐ मूर्तिमते नमः।
८६१ ॐ सर्वभूतात्मने नमः।
८६२ ॐ आर्तत्राणपरायणाय नमः।
८६३ ॐ सर्वज्ञाय नमः।
८६४ ॐ सर्वसुलभाय नमः।
८६५ ॐ सर्वशास्त्रविशारदाय नमः।
८६६ ॐ षड्गुणैश्वर्यसम्पन्नाय नमः।
८६७ ॐ पूर्णकामाय नमः।
८६८ ॐ धुरन्धराय नमः।
८६९ ॐ महानुभावाय नमः।
८७० ॐ कैवल्यदायकाय नमः।
८७१ ॐ लोकनायकाय नमः।
८७२ ॐ आदिमध्यान्तरहिताय नमः।
८७३ ॐ शुद्धसात्त्विकविग्रहाय नमः।
८७४ ॐ असमानाय नमः।
८७५ ॐ समस्तात्मने नमः।

८७६ ॐ शरणागतवत्सलाय नमः।
८७७ ॐ उत्पत्तिस्थितिसंहारकारणाय नमः।
८७८ ॐ सर्वकारणाय नमः।
८७९ ॐ गम्भीराय नमः।
८८० ॐ सर्वभावज्ञाय नमः।
८८१ ॐ सच्चिदानन्दविग्रहाय नमः।
८८२ ॐ विष्वक्सेनाय नमः।
८८३ ॐ सत्यसन्धाय नमः।
८८४ ॐ सत्यवते नमः।
८८५ ॐ सत्यविक्रमाय नमः।
८८६ ॐ सत्यव्रताय नमः।
८८७ ॐ सत्यसंज्ञाय नमः।
८८८ ॐ सर्वधर्मपरायणाय नमः।
८८९ ॐ आपन्नार्तिप्रशमनाय नमः।
८९० ॐ द्रौपदीमानरक्षकाय नमः।
८९१ ॐ कन्दर्पजनकाय नमः।
८९२ ॐ प्राज्ञाय नमः।
८९३ ॐ जगन्नाटकवैभवाय नमः।

८९४ ॐ भक्तिवश्याय नमः।
८९५ ॐ गुणातीताय नमः।
८९६ ॐ सर्वैश्वर्यप्रदायकाय नमः।
८९७ ॐ दमघोषसुतद्वेषिणे नमः।
८९८ ॐ बाणबाहुविखण्डनाय नमः।
८९९ ॐ भीष्मभक्तिप्रदाय नमः।
९०० ॐ दिव्याय नमः।
९०१ ॐ कौरवान्वयनाशनाय नमः।
९०२ ॐ कौन्तेयप्रियबन्धवे नमः।
९०३ ॐ पार्थस्यन्दनसारथये नमः।
९०४ ॐ नारसिंहाय नमः।
९०५ ॐ महावीराय नमः।
९०६ ॐ स्तम्भजाताय नमः।
९०७ ॐ महाबलाय नमः।
९०८ ॐ प्रह्लादवरदाय नमः।
९०९ ॐ सत्याय नमः।
९१० ॐ देवपूज्याय नमः।
९११ ॐ अभयङ्कराय नमः।

११२ ॐ उपेन्द्राय नमः।
११३ ॐ इन्द्रावरजाय नमः।
११४ ॐ वामनाय नमः।
११५ ॐ बलिबन्धनाय नमः।
११६ ॐ गजेन्द्रवरदाय नमः।
११७ ॐ स्वामिने नमः।
११८ ॐ सर्वदेवनमस्कृताय नमः।
११९ ॐ शेषपर्यङ्कशयनाय नमः।
१२० ॐ वैनतेयरथाय नमः।
१२१ ॐ जयिने नमः।
१२२ ॐ अव्याहतबलैश्वर्य-
सम्पन्नाय नमः।
१२३ ॐ पूर्णमानसाय नमः।
१२४ ॐ योगेश्वरेश्वराय नमः।
१२५ ॐ साक्षिणे नमः।
१२६ ॐ क्षेत्रज्ञाय नमः।
१२७ ॐ ज्ञानदायकाय नमः।
१२८ ॐ योगिहृत्पङ्कजावासाय नमः।

१२९ ॐ योगमायासमन्विताय नमः।
१३० ॐ नादबिन्दुकलातीताय नमः।
१३१ ॐ चतुर्वर्गफलप्रदाय नमः।
१३२ ॐ सुषुम्णामार्गसञ्चारिणे नमः।
१३३ ॐ देहस्यान्तरसंस्थिताय नमः।
१३४ ॐ देहेन्द्रियमनःप्राणसाक्षिणे नमः।
१३५ ॐ चेतः प्रसादकाय नमः।
१३६ ॐ सूक्ष्माय नमः।
१३७ ॐ सर्वगताय नमः।
१३८ ॐ देहिने नमः।
१३९ ॐ ज्ञानदर्पणगोचराय नमः।
१४० ॐ तत्त्वत्रयात्मकाय नमः।
१४१ ॐ अव्यक्ताय नमः।
१४२ ॐ कुण्डलीसमुपाश्रिताय नमः।
१४३ ॐ ब्रह्मण्याय नमः।
१४४ ॐ सर्वधर्मज्ञाय नमः।
१४५ ॐ शान्ताय नमः।
१४६ ॐ दान्ताय नमः।

१४७ ॐ गतक्लमाय नमः।
१४८ ॐ श्रीनिवासाय नमः।
१४९ ॐ सदानन्दाय नमः।
१५० ॐ विश्वमूर्तये नमः।
१५१ ॐ महाप्रभवे नमः।
१५२ ॐ सहस्रशीर्ष्णे नमः।
१५३ ॐ पुरुषाय नमः।
१५४ ॐ सहस्राक्षाय नमः।
१५५ ॐ सहस्रपदे नमः।
१५६ ॐ समस्तभुवनाधाराय नमः।
१५७ ॐ समस्तप्राणरक्षकाय नमः।
१५८ ॐ समस्तसर्वभावज्ञाय नमः।
१५९ ॐ गोपिकाप्राणवल्लभाय नमः।
१६० ॐ नित्योत्सवाय नमः।
१६१ ॐ नित्यसौख्याय नमः।
१६२ ॐ नित्यश्रिये नमः।
१६३ ॐ नित्यमङ्गलाय नमः।
१६४ ॐ व्यूहार्चिताय नमः।

१६५ ॐ जगन्नाथाय नमः।
१६६ ॐ श्रीवैकुण्ठपुराधिपाय नमः।
१६७ ॐ पूर्णानन्दघनीभूताय नमः।
१६८ ॐ गोपवेषधराय नमः।
१६९ ॐ हरये नमः।
१७० ॐ कलापकुसुमश्यामाय नमः।
१७१ ॐ कोमलाय नमः।
१७२ ॐ शान्तविग्रहाय नमः।
१७३ ॐ गोपाङ्गनावृताय नमः।
१७४ ॐ अनन्ताय नमः।
१७५ ॐ वृन्दावनसमाश्रयाय नमः।
१७६ ॐ वेणुवादरताय नमः।
१७७ ॐ श्रेष्ठाय नमः।
१७८ ॐ देवानां हितकारकाय नमः।
१७९ ॐ बालक्रीडासमासक्ताय नमः।
१८० ॐ नवनीतस्य तस्कराय नमः।
१८१ ॐ गोपालकामिनीजाराय नमः।
१८२ ॐ चोरजारशिखामणये नमः।

१८३ ॐ परस्मै ज्योतिषे नमः।
१८४ ॐ पराकाशाय नमः।
१८५ ॐ परावासाय नमः।
१८६ ॐ परिस्फुटाय नमः।
१८७ ॐ अष्टादशाक्षराय नमः।
१८८ ॐ मन्त्राय नमः।
१८९ ॐ व्यापकाय नमः।
१९० ॐ लोकपावनाय नमः।
१९१ ॐ सप्तकोटिमहामन्त्रशेखराय नमः।
१९२ ॐ देवशेखराय नमः।
१९३ ॐ विज्ञानज्ञानसन्धानाय नमः।
१९४ ॐ तेजोराशये नमः।
१९५ ॐ जगत्पतये नमः।
१९६ ॐ भक्तलोकप्रसन्नात्मने नमः।
१९७ ॐ भक्तमन्दारविग्रहाय नमः।
१९८ ॐ भक्तदारिद्र्यदमनाय नमः।
१९९ ॐ भक्तानां प्रीतिदायकाय नमः।
१००० ॐ भक्ताधीनमनसे नमः।

१००१ ॐ पूज्याय नमः।
१००२ ॐ भक्तलोकशिवङ्कराय नमः।
१००३ ॐ भक्ताभीष्टप्रदाय नमः।
१००४ ॐ सर्वभक्ताघौघनिकृन्तनाय नमः।
१००५ ॐ अपारकरुणासिन्धवे नमः।
१००६ ॐ भगवते नमः।
१००७ ॐ भक्ततत्पराय नमः।

॥ इति श्रीसम्मोहनतन्त्रे पार्वतीश्वरसंवादे श्रीगोपालसहस्रनामावलिः सम्पूर्णा॥

भगवान् श्रीगोपालजी

जय जय आरति श्रीगोपालकी।
आनँदकंद सकल सुखसागर
नवनागर नँदलालकी॥
सव्य अंग वृषभानुनंदिनी
चहुँदिसि गोपीमालकी।
जय श्रीभट्ट बार-बार बलिहारी
श्रीराधानामिनि बालकी॥

≈≈○≈≈